# shrIshyAmadevastavaH

# શ્રીશ્યામદેવસ્તવઃ

## Document Information

Text title : shyAmadevastavaH

File name : shyAmadevastava.itx

Category : deities_misc

Location : doc_deities_misc

Author : ShyAmabhakta khATunivAsI paNDit rAmaprasAda sharmA

Transliterated by : anonymous456an at gmail.com

Proofread by : anonymous456an at gmail.com

Description-comments : shyAmadevopAsana Puja book by Shri Kishor Mishra

Latest update : October 2, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 2, 2020

*sanskritdocuments.org*

# શ્રીશ્યામદેવસ્તવઃ

ૐ અસ્ય શ્રીશ્યામદેવસ્તોત્રમન્ત્રસ્ય બ્રહ્મા ઋષિઃ ।
અત્યષ્ટિઃ (શિખરિણી) છન્દઃ । શ્રીશ્યામો દેવતા ।
સકલમનોરથસિદ્ધ્યર્થે શ્રીશ્યામદેવતાપ્રીત્યર્થે ચ જપે વિનિયોગઃ ।

શિવબ્રહ્મેન્દ્રાદ્યૈરખિલસુરવર્યૈરિહ સદા
મુનીન્દ્રૈઃ સિદ્ધેન્દ્રૈર્ભૃગુકપિલમુખ્યૈઃ સ્તુતપદમ્ ।
દયાયુક્તં નાથં નરકપતિતોદ્ધારણપરં
ભજેઽહં શ્રીશ્યામં ભવભયહરં ભક્તવરદમ્ ॥ ૧॥

મહોત્સાહં વિષ્ણું શુભશશિમુખં પદ્મનયનં
કિરીટાઢ્યં કાન્ત્યાવૃતતનુમનન્તં ગુણનિધિમ્ ।
વિના પ્રાક્પુણ્યોઘૈર્દુરધિગમનિઃસીમવિભવં
ભજેઽહં શ્રીશ્યામં ભવભયહરં ભક્તવરદમ્ ॥ ૨॥

સદા વંશીવાદ્યં સજલજલદાભં સુચરિતં
મુદા ગોપીગોપાદ્યભયવરદં દુષ્ટદમનમ્ ।
બકીનાશં કૃષ્ણં હ્યઘવકતૃણાવર્તકરિપું
ભજેઽહં શ્રીશ્યામં ભવભયહરં ભક્તવરદમ્ ॥ ૩॥

મનોજ્ઞં કંસારિં કરિકુવલયાપીડદમનં
હરિં રઙ્ગે યાન્તં કઠિનતરચાણૂરપ્રશમનમ્ ।
સ્વપિત્રોરાનન્દં દદતમધિકં પ્રીતિજનકં
ભજેઽહં શ્રીશ્યામં ભવભયહરં ભક્તવરદમ્ ॥ ૪॥

મુદાભિર્નારીભિર્મદિતનટનાટ્યૈકનિપુણં
ક્વણત્કાઞ્ચીકાન્તિક્વણિતસુખસઙ્ગીતકવરમ્ ।
શુભં તં કૌશેયામ્બરધરમુદારં વનગતં
ભજેઽહં શ્રીશ્યામં ભવભયહરં ભક્તવરદમ્ ॥ ૫॥

સુકાલિન્દીકૂલે ઘનતરતરૌ સ્વચ્છરજસિ
સ્ફુટજ્જાતીપદ્મે સુરભિણિ સદા કુઞ્જનિલયે ।
લસન્તં ગોપીભિઃ શરદિ સુરનારીભિરમલં
ભજેઽહં શ્રીશ્યામં ભવભયહરં ભક્તવરદમ્ ॥ ૬॥

પિબન્તં દાવાગ્નિં શમનમખિલાનાં ચ વિપદાં
પદં તત્સૌખ્યાનાં પ્રચુરતરકાલીયદમનમ્ ।
હરન્તં સન્તાપં વ્રજજનવરાણાં સુતપસાં
ભજેઽહં શ્રીશ્યામં ભવભયહરં ભક્તવરદમ્ ॥ ૭॥

સુશૈલેન્દ્રં હસ્તે દધતમનિશં સપ્તદિવસં
જનાનાં સ્વીયાનાં વિવિધવિપદાં સઙ્ક્ષયકરમ્ ।
ગવાં ત્રાણાર્થં વૈ ગિરિવરધરં નન્દતનયં
ભજેઽહં શ્રીશ્યામં ભવભયહરં ભક્તવરદમ્ ॥ ૮॥

સુરેશં ગોવિન્દં મણિકનકહારાઙ્ગદધરં
સુપિચ્છાપીડં કૌસ્તુભરુચિરવક્ષઃપરિસરમ્ ।
રમેશં લોકાનાં હિતકરમલં વિશ્વજનકં
ભજેઽહં શ્રીશ્યામં ભવભયહરં ભક્તવરદમ્ ॥ ૯॥

ચિદાનન્દાકારં મુનિવરહૃદિ પ્રાપ્તનિલયં
યજુઃસામાથર્વપ્રભૃતિષુ તથા ઋક્ષુ વિદિતમ્ ।
અચિન્ત્યં દુર્બોધં પ્રકૃતિગુણયુક્તૈશ્ચ પુરુષૈ-
ર્ભજેઽહં શ્રીશ્યામં ભવભયહરં ભક્તવરદમ્ ॥ ૧૦॥

સ્તવઃ શ્યામદેવસ્ય વિષ્ણોર્મયાઽયં
કૃતો દિઙ્મિતૈઃ શુદ્ધભાવેન પદ્યૈઃ ।
સુરામપ્રસાદાભિધાનેન યાયાત્
પઠેદ્યો નરઃ શ્યામદેવપ્રસાદમ્ ॥ ૧૧॥

॥ ઇતિ શ્રીશ્યામદેવસ્તવઃ સમ્પૂર્ણઃ ॥

ભગવાન્ શ્રીશ્યામદેવ રાજસ્થાન કે અતિપ્રસિદ્ધ દેવતા હૈં
ઔર લાખોં ઘરોં કે કુલદેવ, ઇષ્ટદેવ હૈં । શ્રીશ્યામદેવ
કો કથા સંસ્કૃતસાહિત્ય કે અનુપમ નિધિ પુરાણોં મેં ઉપલબ્ધ
હૈં। શ્રીશ્યામપ્રભુ કી વિસ્તૃત કથા મહર્ષિ વેદવ્યાસ-રચિત
અષ્ટાદશ મહાપુરાણોં મેં સે અન્યતમ, પ્રધાન સ્કન્દ-પુરાણ કે

કૌમારિકાખણ્ડ મેં મિલતી હૈ । યહ કથા પાઁચ અધ્યાયોં (૩૪૫
શ્લોકોં) મેં હૈ, જો અતીવ સુન્દર, રોચક એવં ઉપદેશપ્રદ હૈ ।
ઇસકે અતિરિક્ત ભારતસાર મેં ભી સંક્ષિપ્ત શ્રીશ્યામદેવકથા
દો અધ્યાયોં (૪૬ શ્લોકોં) મેં કિઞ્ચિત્ રૂપાન્તર સે ઉપલબ્ધ હોતી હૈ ।

Encoded and proofread by anonymous456an at gmail.com

---

*shrIshyAmadevastavaH*

pdf was typeset on October 2, 2020

Please send corrections to *sanskrit@cheerful.com*